## वस्तुनिष्ठप्रश्नाः
## शास्त्री-1, II

28.08.20
3

(1) अनुरक्ता किं करोति ?

उत्तरम् - प्रियम् प्रियं वदति ।

(2) 'अकस्मात् क्षुरतो भुवा कश्चिद्वापिजति स्वामि' ति कस्य वाक्यम् ?

उत्तरम् - कश्यपस्य ।

(3) 'पश्चात् सम्प्रतिष्ठति पूर्वसुप्ता' कुत्रेयं सूक्तिः ?

उत्तरम् - बृहत्संहितायाम् ।

(4) 'तीर्थप्रांजायिनं भोके परवेश्मसमागमम्' इति कस्य वाक्यम्

उत्तरम् - कश्यपस्य ?

(5) स्त्रीणां स्वभावजाः प्रमुख्या दोषा कति ?

उत्तरम् - दश ।

(6) 'आत्मगुप्ता भर्तृभक्ता सा श्रीरित्युच्यते बुधै' रिति कस्य वाक्यम् ?

उत्तरम् - व्यासस्य ।

(7) 'सुप्तेऽनुसुप्ता प्रथमं विबुद्धा' इयं सूक्तिः कुत्र ?

उत्तरम् - बृहत्संहितायाम् ?

(8) रजस्वलायां स्त्री कदा चाण्डाली कन्या भवति ?

उत्तरम् - प्रथमेऽहनि ।

(9) कतिषु दिनेषु रजस्वला स्त्री शुद्ध्यति ?

उत्तरम् - चतुर्षु ।

(10) कतमे दिने रजस्वला स्त्री ब्रह्मघातिनी भवति ?

उत्तरम् - द्वितीये दिने ।

डॉ० सुधिष्ट कुमार
सहा० प्राध्यापक (ज्योतिष)
रा० उ० सं० महाविद्यालय सुरवसैना,
पूर्णियाँ।

उपशास्त्री

28.08.20
2

अथ केन्द्रत्रिकोणयोः स्वामिनोः दशाफलमाह—

स्वदशायां त्रिकोणेशभुक्तौ केन्द्रपतिः शुभम् ।
दिशेत् सोऽपि तथा नो चेदसम्बन्धेन पापकृत् ॥

अन्वयः – सम्बन्धत्वात् केन्द्रपतिः स्वदशायां त्रिकोणेशभुक्तौ च शुभं दिशेत् नो चेत असम्बन्धेन पापकृत भवति ।

संस्कृत – स्वदशायामिति – सम्बन्धत्वात् केन्द्रपतिः लग्नचतुर्थ-सप्तम-दशमभवनस्वामी स्वदशायां आत्ममहादशायां, त्रिकोणेशभुक्तौ त्रिकोणाधीशस्यान्तर्दशायां शुभं शुभफलं दिशेत दद्यात् । सोऽपि त्रिकोणेशोऽपि तथा पूर्ववत् फलं दिशेत, नो चेत् सम्बन्धाभावश्चेत, तदाऽसम्बन्धेन सम्बन्धरहितेन पापकृत अशुभकृद् भवतीति शेषः ।

एतदुक्तमस्तियत् यदि केन्द्रेशानां त्रिकोणपतिभिः सम्बन्धः तदा केन्द्रपतिः स्वदशायां तद् त्रिकोणेशान्तर्दशायां तथा त्रिकोणपतीनां स्वदशासम्बन्धिकेन्द्रेशान्तर्दशायां भाग्योदयरूपशुभफलं दिशेत् सम्बन्धाभावत्वे सति धनहानिरूपाशुभं फलमेव द्वयोरवस्थायां भवति ।

क्षेमङ्करी – केन्द्राधीश महादशानाथ अपनी दशा काल में सम्बन्धी त्रिकोणेश की अन्तर्दशा के समय शुभफल को देता है । वैसे ही दशेश त्रिकोणेश अपनी दशा काल में सम्बन्धी केन्द्रेश की अन्तर्दशा के समय शुभ फल देता है । इसके विपरीत अर्थात् केन्द्रेश व त्रिकोणेश यदि सम्बन्धी न हो, तब अपनी दशा में केन्द्रेश त्रिकोणेश की अन्तर्दशा के समय अशुभफल देता है । उसी प्रकार असम्बन्धी त्रिकोणेश की दशा में केन्द्रेश की अन्तर्दशा में अशुभफल ही प्राप्त होता है ।

डॉ० सुदिष्ट कुमार
सहा० प्राचार्य (ज्योतिष)
रा०उ० सं० महावि० सुखसेना,
पूर्णियाँ ।

सामान्यबलिनां ग्रहाणां फलमाह —

दशेशात् स्वनाथविरुद्धफलदायिनाम् ।
स्वदशास्वनुरूपेण फलान्यूह्यानि सूरिभिः ॥

अन्वयः – सूरिभिः स्वनाथ विरुद्ध फलदायिनाम् दशेशात् तत्फलानुरूपेण फलानि ऊह्यानि ।

व्याख्या — दशेशात् सूरिभिः विद्वद्भिः स्वनाथ विरुद्धफलदायिनां ग्रहाणां यदि दशानाथः ... विरुद्धे भवति तदा अन्तर्दशानाथः विरुद्धफलं दद्यात् यदि तेषां ते स्वनाथविरुद्धफलदायिनः । इत्येषां स्व-स्वदशानाथविरोधिनां ग्रहाणां, स्वस्वफलानुरूपेण तस्य तस्य दशान्तर्दशाधिपतीनां फलानाम् अनुरूपेण अनुरूपं ... फलानि ... फलानि, ऊह्यानि प्रकल्पनीयानि ।

एवं तत्र ग्रहा द्विधा भवेयुः सम्बन्धिनोऽसम्बन्धिनश्च इति । तेऽपि चतुर्विधा भवन्ति । सम्बन्धिनः सधर्मिणः, असम्बन्धिनो विरुद्धधर्मिणः, सम्बन्धिनोऽनुरूपधर्मिणः, असम्बन्धिनः सधर्मिणः, अथ सम्बन्धिनो विरुद्धधर्मिणः, असम्बन्धिनोऽनुरूपधर्मिण इति । तत्र ये सम्बन्धिनः सधर्मिणः सन्ति, तेषां फलं सर्वथा उत्तमेव स्यात् । तेभ्यो न्यूनं फलं सम्बन्धिनामनुरूपधर्मिणां, तेभ्योऽपि न्यूनं फलं सम्बन्धिनां विरुद्धधर्मिणामिति ।

विमर्श – ग्रह समानधर्म या सधर्मी या सहकर्मी वाले हो सकते हैं अथवा विपरीत धर्म वाले अथवा समधर्मी भी ग्रह हो सकते हैं । दशेश के सम्बन्धी और सधर्मी, मित्र या अधिमित्र ग्रह की अन्तर्दशा शुभफलदायी होगी । दशेश के समधर्मी और समग्रह की अन्तर्दशा सामान्य फलदायी होगी । दशेश के विपरीत धर्मवाले, विरोधी ग्रह, शत्रु या अधिशत्रु ग्रह की अन्तर्दशा भी अशुभद होगी ।